
क्नूयते मत्स्यः दुर्गन्धः स्यादित्यर्थः । क्नूयते वस्त्र-मम्भसा । इति दुर्गादासः ॥


क्मर, कौटिल्ये । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) ओष्ठवर्गशेषयुक्तः । क्मरति खलः कुटिलः स्यादित्यर्थः । इति दुर्गादासः ॥

क्रकचः, पुं क्ली, ग्रन्थिलवृक्षः । इति मेदिनी ॥ (ज्योतिषोक्तयोगभेदः । तस्य लक्षणं यथा,—
"षष्ठादितिथयो मन्दाद् विलोमं क्रकचः स्मृतः" ॥
अस्य विवृतिर्यथा ।
"शनौ षष्ठी, शुक्रे सप्तमी, गुरौ अष्टमी, बुधे नवमी, भौमे दशमी, सोमे एकादशी, रवौ द्वादशी, एते योगाः क्रकचाख्या विज्ञेयाः" । यथा, नारदोक्तिः ।
"त्रयोदशस्युर्मिलने संख्ययोस्तिथिवारयोः ।
क्रकचो नाम योगोऽयं मङ्गलेष्वतिगर्हितः" ॥*॥
क्र इति कृत्वा कचति शब्दायते । कच शब्दे + पचाद्यच् ।) करपत्रम् । काष्ठविदारणास्त्रविशेषः । करात् इति भाषा । इत्यमरः । १ । १० । ३५ ॥ (यथा, महाभारते ३ । २२ । ३४ ।
"मध्येन पाटयामास क्रकचो दार्व्विवोच्छ्रितम्" ॥)
"अथ क्रकचव्यवहारे करणसूत्रं वृत्तम् । पिण्डयोगदलमग्रमूलयोर्द्दैर्घसंगुणितमङ्गुलात्मकम् । दारुदारणपथैः समाहतं षट्स्वरेषु विहृतं करात्मकम् ॥ उदाहरणम् ।
मूले नखाङ्गुलमितोऽथ नृपाङ्गुलोऽग्रे
पिण्डः शताङ्गुलमितं किल यस्य दैर्घ्यम् ।
तद्दारुदारणपथेषु चतुर्षु किं स्या-
द्धस्तात्मकं वद सखे गणितं द्रुतं मे ॥

न्यासः




पिण्डयोगदलम् । १८ । दैर्घ्येण । १०० । संगुणितम् । १८०० । दारुदारणपथैः । ४ । गुणितम् । ७२०० । षट्स्वरेषु । ५७६ । विहृतं जातं करात्मकं गणितम् । २५/२ ॥ क्रकचान्तरे करणसूत्रं सार्द्धवृत्तम् । छिद्यते तु यदि तिर्य्यगुक्तवत् पिण्डविस्तृतिहते फलं तदा । इष्टिकाचितिदृषच्चितिखातक्राकचव्यवहृतौ खलु मूल्यम् । कर्म्मकारजनसम्प्रतिपत्त्या तन्मृदुत्वकठिनत्ववशेन ॥ उदाहरणम् ।
यद्विस्तृतिर्द्दन्तमिताङ्गुलानि
पिण्डस्तथा षोड़श यत्र काष्ठे ।
छेदेषु तिर्य्यङ्नवसु प्रचक्ष्व
किं स्यात् फलं तत्र करात्मकं मे ॥




विस्तृतिहतिः । ५१२ । दारुदारणमार्गं । ९ । घ्ना । ४६०८ । षट्स्वरेषु । ५७६ । विहृतं जातं फलं हस्ताः । ८ । इति लीलावत्यां क्रकचव्यवहारः ॥ * ॥

क्रकचच्छदः, पुं, (क्रकचः करपत्रमिव च्छदाः पत्राणि यस्य ।) केतकीवृक्षः । इति त्रिकाण्डशेषः ॥

क्रकचपत्रः, पुं, (क्रकचवत् पत्रं अस्य ।) शाकवृक्षः । इति राजनिर्घण्टः ॥ (केतकीवृक्षः ॥)

क्रकचपात्, [द्] पुं, (क्रकच इव पादो यस्य । अन्त्यलोपः ।) कृकलासः । इति त्रिकाण्डशेषः ॥

क्रकचपादः, पुं, (क्रकचमिव पादो यस्य ।) कृकलासः । इति हारावली ॥

क्रकचपृष्ठी, स्त्री, (क्रकचवत् पृष्ठं पृष्ठदेशो यस्याः । इति ङीष् ।) कवयी मत्स्यः । इति शब्दरत्नावली ॥

क्रकचा, स्त्री, (क्रकचस्तदाकारोऽस्त्यस्याः । अर्श आदिभ्यः अच् ततष्टाप् ।) केतकी इति रत्नमाला ॥

क्रकणः, पुं, (क्र इति कणति शब्दायते । कण शब्दे + अच् । जातित्वात् स्त्रियां ङीष् ।) पक्षिविशेषः । इत्यमरः ॥ कयार इति भाषा ॥

क्रकरः, पुं, (क्र इति शब्दं कर्त्तुं शीलमस्य इति । कृ + ताच्छील्ये टः ।) करीरवृक्षः । उट्काटार इति भाषा । क्रकणपक्षी । इत्यमरः । २ । ५ । १९ ॥ कयार इति करकरा इति च भाषा ॥ (यथा,— महाभारते १३ । १११ । १०३ ।
"पत्रोर्णं चोरयित्वा तु क्रकरत्वं नियच्छति" ॥)
अस्य मांसस्य गुणः । लघुत्वम् । हृद्यत्वम् । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते ।
"चकोरकलविङ्कमयूरक्रकर इत्याद्युपक्रम्य
लघवः क्रकरा हृद्यास्तथा चैवोपचक्रकाः" ॥
इत्यन्तेनोपसंहृताः ॥) दीनः । क्रकचः । इति मेदिनी ॥

क्रतुः, पुं, (क्रियतेऽसौ इति । कृ + "कृञः कतुः" । उणां १ । ७८ । इति कर्म्मणि कतु प्रत्ययः ।) यज्ञः इत्यमरः ॥ सप्तर्ष्यन्तर्गतब्रह्ममानसपुत्रमुनिविशेषः । इति मेदिनी । अयन्तु ब्रह्मणः कराज्जातः । (यथा, महाभारते । १ । ६५ । १० ।
"ब्रह्मणो मानसाः पुत्रा विदिताः षण्महर्षयः ।
मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः" ॥)
एतस्य भार्य्या प्रजापतेः कर्द्दमस्य कन्या क्रिया । पुत्राः षष्टिसहस्रवालिखिल्याख्याङ्गुष्ठमात्रा ऋषयः ।
(यथा,—भागवते । ४ । १ । ३८ ।
"क्रतोरपि क्रिया भार्य्या वालखिल्यानसूयत ।
ऋषीन् षष्टिसहस्राणि ज्वलतो ब्रह्मतेजसा" ॥
विश्वेदेवविशेषः । यथा, हरिवंशे ।
आत्मार्थे चासृजत्पुत्रान् लोककर्त्तॄन् पितामहः ॥
विश्वे प्रजानां पतयो येभ्यो लोका विनिःसृताः" ॥
तत उक्तं "दक्षं मरीचिमत्रिञ्च पुलस्त्यं पुलहं क्रतुं । वशिष्ठं गौतमञ्चैव भृगुमङ्गिरसं मनुम्" । इत्याद्युपक्रम्य ।
"अथर्व्वभूता इत्येते ख्याताश्चैव महर्षयः ।
त्रयोदशसुता येषां वंशा वै संप्रतिष्ठिताः" ॥
जटाधरेण तु "विश्वेदेवा दशस्मृताः" । इत्युक्तं तत्कल्पभेदादविरुद्धम् ॥
यथा, शतपथब्राह्मणे १० । ६ । ३ । १ ।
"यावत् क्रतुरयमस्माल्लोकात् प्रेत्यैतं क्रतुरमुं लोकं प्रेत्य सम्भवति" ॥
यूपसहितः सोमसाध्यो यज्ञः । विष्णुः । यथा, विष्णुसंहितायाम् ।
"यज्ञ इज्यो महेज्यश्च क्रतुः सत्रं सतां गतिः" ॥
अस्य भाष्यं यथा,—
"अस्य सर्व्वयज्ञस्वरूपत्वात् यज्ञः यूपसहितो यज्ञः क्रतुरिति" । अतएव विष्णोः सर्व्वयज्ञमयत्वात् यज्ञत्वं क्रतुशब्दस्यापि यूपसहितयज्ञबोधकत्वं प्रसिद्धम् ॥ तद्यागे शतपथब्राह्मणादावुल्लिखिता यूपविशेषाः । यथा, तत्र सोमसाध्ययागाश्च त्रयः क्रतवः । तथाहि श्रुतौ "त्रीन् क्रतूनन्वाहाग्नेयमुषस्यमाश्विनम्" । सङ्कल्पः । सङ्कल्पस्तु कामनाधीनश्चित्तवृत्तिविशेषः । उक्तञ्च "कामः क्रतुः कर्म्म जन्मेत्येवमेषां क्रमो भवेत्" ।
पुंसो या विषयापेक्षा स काम इति भण्यते ।
स एव वर्द्धमानश्चेत् क्रतुत्वं प्रतिपद्यते" ॥
रुचेरातिशय्यम् । यथा,—
"रुचेरतिशयः काम्ये विषये क्रतुरीर्य्यते" ॥
स्तुत्यादिकर्म्म । यथा, ऋग्वेदे । ४ । २१ । १० ।
"पुरुष्टुत ! क्रत्वा नः स्वस्ति" । "क्रत्वा कर्म्मणा स्तुत्यादिहेतुना" । इति भाष्यम् ॥
प्रज्ञा । यथा, छान्दोग्योपनिषदि । "अथ खलु क्रतुमयः पुरुषो यथा क्रतुरस्मिन् लोके पुरुषो भवति । तथेतः प्रेत्य भवति स क्रतुं कुर्व्वीत" ॥
अस्य भाष्यं यथा,—
"कथमुपासीत । स क्रतुं कुर्व्वीत क्रतुर्निश्चयोऽध्यवसायश्च एवमेव नान्यथेति अविचलः प्रत्ययस्तं क्रतुं कुर्व्वीतोपासीत इत्यनेन व्यवहितेन सम्बन्धः । किं पुनः क्रतुकरणेन कर्त्तव्यं प्रयोजनम् ? कथं वा क्रतुः कर्त्तव्यः ? क्रतुकरणं वाभिप्रेतार्थसाधनं कथम् ? इत्यस्यार्थस्य प्रतिपादनार्थमथेत्यादिग्रन्थः । अथ खल्विति हेत्वर्थः । यस्मात् क्रतुमयः क्रतुप्रायोऽध्यवसायात्मकः पुरुषो जीवः । यथा क्रतुर्यादृशः क्रतुरस्य सोऽयं यथा क्रतुर्यथाऽध्यवसायो यादृङ्निश्चयोऽस्मिंल्लोके जीवन्निह पुरुषो भवति । तथेतोऽस्माद्देहात् प्रेत्य मृत्वा भवति । क्रत्वनुरूपफलात्मको भवतीत्यर्थः । एव ह्येतच्छास्त्रतो दृष्टम् । 'यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरमित्यादि' । यत एवं व्यवस्था शास्त्र-